# dakShiNAmUrtistavaH by Shrikrishnalilashukamuni

# શ્રીકૃષ્ણલીલાશુકમુનિપ્રણીતો દક્ષિણામૂર્તિસ્તવઃ

## Document Information

Text title : dakShiNAmUrtistavaH

File name : dakShiNAmUrtistavaH.itx

Category : shiva

Location : doc_shiva

Author : Shrikrishnalilashukamuni

Proofread by : Preeti N. Bhandare

Latest update : December 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણલીલાશુકમુનિપ્રણીતો દક્ષિણામૂર્તિસ્તવઃ

દુર્વારગર્વભરદૂરવિજૃમ્ભમાણ-
    મોહાન્ધકારપરિપાટનબદ્ધદીક્ષઃ ।
શશ્વદ્ ભૃશપ્રવિસરત્સહજપ્રકાશ-
    કોશઃ પ્રભુર્જયતિ કોઽપિ વટસ્થલીશઃ ॥ ૧॥

અગ્નીન્દુભાનુભિરશેષજગત્પ્રકાશૈ-
    રાસાદિતં નયનભાવમવેક્ષ્ય વેદાઃ ।
યદ્ વેદયન્તિ મહસાં તમસાં ચ દૂરં
    તદ્ દૈવતં વટતટીદયિતં ભજામઃ ॥ ૨॥

કલ્પદ્રુમૈરલમમીભિરનીશ્વરાણા-
    મારાધનીયપદવીમધિગમ્ય રમ્યૈઃ ।
તેઽમી વયં પરિવૃતં પરમેશ્વરેણ
    તં વા વટં તમપિ વા વિભુમાશ્રયામઃ ॥ ૩॥

ષડ્વર્ગદુર્ગપરિલઙ્ઘનકોપિતેન
    ચિત્તેન યત્ર સુચિરં ચપલા મુનીન્દ્રાઃ ।
તચ્છામ્ભવં મધુરિમૈકરસોર્મિ ધામ
    શ્રીમદ્વટાશ્રયમુપાશ્રયિતું યતધ્વમ્ ॥ ૪॥

નૃત્યન્તિ યચ્છિરસિ નાકનદીપ્રવાહા-
    સ્તદ્ભ્રાતરશ્ચ રસને વચસાં પ્રપઞ્ચાઃ ।
ચિત્તે દયા ચરણરેણુષુ વાઞ્છિતાર્થાઃ
    પાયાદયં વટતટીદયિતો વિભુર્વઃ ॥ ૫॥

ઇન્દ્રાદયો યદરુણાઙ્ઘ્રિરજઃકણેન
    રાજ્યશ્રિયં ત્રિભુવનૈર્ભૃશમુદ્વહન્તિ ।
વ્યાઘ્રત્વચા પરિહિતસ્ય હિ તસ્ય ભિક્ષો-
    ર્વ્યાખ્યાશ્રિયં વટતટાવસથસ્ય વન્દે ॥ ૬॥

આમ્નાયવીચિસહચારિવચઃપ્રસારૈ-
    રાસારસારસરણીમાધિરોહમાણૈઃ ।
આસિચ્ય માનસમનન્યધિયાં મુનીના-
    માદ્યં વટં ચ વિહરન્ ગિરિશોઽવતાદ્ વઃ ॥ ૭॥

મન્દસ્મિતેન ચ મનોહરમુદ્રયા ચ
    વ્યાખ્યાનવીથિવિભવૈશ્ચ વિજૃમ્ભમાણૈઃ ।
આખ્યાયમાનનિજતત્ત્વરસાનુભૂતિ-
    ર્વિશ્વેશ્વરો વટતટપ્રકટોઽવતાદ્વઃ ॥ ૮॥

ઊર્ધ્વં દિવો ભવમધશ્ચ ભુવો ભવન્તં
    તિર્યક્ ચ પર્યવસિતે ભવવૈભવં તમ્ ।
ગાઢં કયાપિ કૃપયા વટવૃક્ષમૂલે
    મન્માનસે ચ વિહરન્તમનન્તમીડે ॥ ૯॥

રક્તાઙ્ગુલીયુગળનર્ત્તિતચારુમુદ્રં
    સંસારવૃક્ષપરિતક્ષપરશ્વધાઢ્યમ્ ।
ક્રીડાગૃહીતમૃગલાઞ્છનલાઞ્છિતાગ્રં
    હસ્તેન જાનુનિહિતેન જગન્મનોજ્ઞમ્ ॥ ૧૦॥

તત્તત્ફણામણિવિભૂષણભાસુરેણ
    ભાગ્યાધિકેન ફણિના કૃતયોગપટ્ટમ્ ।
વામેતરાઙ્ઘ્રિતલકાન્તિકરમ્બિતેન
    વામોરુણા ગિરિસુતાહૃદયં હરન્તમ્ ॥ ૧૧॥

ઇન્દોઃ કલાં ખલુ જટાપટલે વહન્તં
    સર્વાઃ કલા વચનવીથિષુ ચારયન્તમ્ ।
દેવ્યા વૃતં ગિરિજયા મુનિભિઃ શુકાદ્યૈ-
    સ્તં વિશ્વતો વિશદમાદિગુરું પ્રપદ્યે ॥ ૧૨॥

(વિશેષકમ્)

ત્રિભુવનસુભગેયં દક્ષિણામૂર્તિમૂર્તૌ
    ભગવતિ કૃતભાવા કૃષ્ણલીલાશુકીયા ।
જયતુ જયતુ દેવી ભારતી જીવલોક-
    શ્રવણહૃદયજિહ્વાજન્મ સાફલ્યમેતુ ॥ ૧૩॥

ઇતિ શ્રીકૃષ્ણલીલાશુકમુનિવિરચિતો દક્ષિણામૂર્તિસ્તવઃ સમાપ્તઃ ॥

Proofread by Preeti N Bhandare

*dakShiNAmUrtistavaH by Shrikrishnalilashukamuni*

pdf was typeset on June 4, 2022

Please send corrections to *sanskrit@cheerful.com*